REVIEW OF RESEARCH
IMPACT FACTOR : 5.7631(UIF) UGC APPROVED JOURNAL NO. 48514 ISSN: 2249-894X
VOLUME - 8 | ISSUE - 7 | APRIL - 2019

# लोकतन्त्रविमर्शः

बाप्पा - दत्त
सहायक – आचार्यः, संस्कृत-विभागः
सेवायतन-शिक्षण-महाविद्यालयम्, पश्चिमबङ्गम्



**[ ऋग्वैदिकयुगात् कौटिल्यसमयपर्यन्तं विभिधेषु संस्कृतशास्त्रेषु लोकतन्त्रस्य चर्चा अस्माभिः दृश्यते । परन्तु इदानीं कुत्रापि लोकतन्त्रस्य राजतन्त्रस्य च सत्ता न विद्यते । सर्वत्रैव अधिकारतन्त्रं विराजते । तदानीं स्वधर्मपालनाय जनाः सहजरुपेण लोकधर्मस्य अनुपालनं कुर्वन्ति स्म । यदा मनुष्यः धर्मस्य पालनं करोति ततः एव पुत्रधर्मः पिताधर्मः माताधर्मः भगिनीधर्मः मित्रधर्मस्य प्रादुर्भूताः भवन्ति । एते धर्माः एव सम्मिल्य एव विस्तृते लोकधर्मरुपेण मनुष्यां समक्षं उपस्तितं भवति । अस्मिन् कुत्रापि दोषः न दृश्यते । आधुनिकसमये अस्मिन् विकारः उद्भावितः । पाश्चात्यवासनावसिताः भारतीयजनाः भारतीय-लोकतन्त्रोपरि कुठाराघातं अहर्निशं कुर्वन्ति । यस्मात् कारणात् अधिकारबोधः सर्वत्र दरीदृश्यते। कुत्रापि आत्मबोधः कर्तव्यबोधस्य दृष्टिपथं नायाति । - सं० ]**

## प्राक्-कथनम् (Introduction)

**"लोक्यते असौ इति लोकः"** इति व्युत्पत्त्या लोकस्य नाम जनता प्रजा वा वर्तते । एवमेव तन्त्रं नाम शासनमिति वुधैः आख्यायितः। अतः लोकतन्त्रमित्यस्यार्थः भवति जनानां शासनम् । लोकव्यवहारे इदानीं शब्दोऽयं वैज्ञानिकरूपेण व्यवहृयते । अस्य अपरा संज्ञा जनतन्त्रं गणतन्त्रं वा वर्तते । लोकतन्त्रमेव प्रजातन्त्रनाम्नाभिधीयते। अयं लोकशब्दः ऋग्वेदादारभ्यः संस्कृतसाहित्ये अनेकेषु ग्रन्थेषु प्राप्यते । वस्तुतः लोकतन्त्रशासने **"प्रजा एव राजा"** भवति, तस्मात् लोकतन्त्रमित्युच्यते । लोकतन्त्रशासने लोकतन्त्रस्य व्याख्या प्रसङ्गे **आब्राहमलिङ्कनमहोदयेनोक्तम्- "लोकतन्त्रं जनतायाः जनताद्वारा जनतायै च सर्वकारो वर्तते"।**

"It is a Government of the people, by the people and for the people"- Abraham Lincon.

**ब्राइस्** नामकेण विदुषा उक्तम्- लोकतन्त्रं सर्वकारस्य ( प्रशासनस्य) तत् स्वरूपं विद्यते यस्य राज्यस्य प्रशासकीयशक्तिः कस्यचन वर्गविशेषस्याधिकारे न भवति । अपि तु सा शक्तिः सम्पूर्णजनसमाजस्य प्रतिनिधिनामायत्ता भवति ।

"It is the form of Government in which the ruling power of state is legally vested, not in any particular class but in the members of community as a whole" -Bryec

**डायसीमहोदयानुसारेण** लोकतन्त्रं प्रशासनस्य तद्रूपं वर्तते यत्र प्रशासनशक्तिसम्पूर्णस्य राष्ट्रस्य महतीहऽस्यायत्ता भवति ।

"Democracy is a form of Government in which governing body is comparatively in large fraction of the entire nation".-Diecy

लोकतन्त्रशासने प्रजया निर्वाचिताःप्रतिनिधयःप्रजाप्रतिनिधित्वेन कार्यं कुर्वन्ति । तत्र प्रजा एव प्रत्यक्षाप्रत्यक्षरीत्या निर्वाचनपद्धत्या, प्रतिनिधिसरण्या च शासनचक्रं संसृजति । प्रजा सर्वाङ्गसुन्दरशासनस्य, शासनविधानस्य च निर्माणं करोति ।

इदं लोकतन्त्रशासनं कदा कथं वा प्रादुर्बभूव इति प्रश्नः अस्माकं मनसि उदेति । पुरावृत्तानुशीलनेन ज्ञायते यत् कालानुसारं परिस्थित्यानुसारञ्च नैकाः राजपद्धतयः प्रचलिताः। यथा- कुलीनतन्त्रं, क्रूरतन्त्रं, मूर्खजनतन्त्रं, राज्यतन्त्रं, प्रजातन्त्रम् इत्यादीनि विविधानि राजतन्त्राणि यथासमयं प्रादुर्भूतानि । एतासु शासनपद्धतिषु सर्वोत्कृष्टा लोकतन्त्रपद्धतिरेव इत्यत्र नास्ति कोऽपि संशयावकाशः । लोकतन्त्रपद्धतेः प्रादुर्भावः इटाली-देशे एव समभवत् इति भूयसाम् इतिहासविदां सम्मतिः। तत्र गेरबाल्डी-नामकः कश्चनः महान् क्रान्तिकारी एव एतस्याः पद्धतेः आविष्कर्ता इति मन्यते।

लोकतन्त्रस्य शाब्दिकार्थः लोकशासनमिति । संस्कृते लोकःनाम जनता, तन्त्रं नाम शासनमिति । अर्थात् यत्र जनता स्वकीयं शासनं स्वयमेव करोति, तत् तन्त्रं लोकतन्त्रनाम्नाभिधीयते । यद्यपि लोकतन्त्रस्य परिभाषानुसारेण "जनतायाः जनताद्वारा जनतायै च सर्वकारो

वर्तते" तथापि देशकालपरिस्थितिवशात् लोकतन्त्रविषयिणी धारणा जटिला जाता। अर्थात् भिन्नदेशे भिन्नकाले अयं लोकशब्दः भिन्नरूपेण व्यवहृयते। तद्यथा- प्रतिनिधि-लोकतन्त्रम्, उदार-लोकतन्त्रम्, प्रत्यक्ष-लोकतन्त्रम्, आधुनिक-लोकतन्त्रम् इति।

**प्रतिनिधि-लोकतन्त्रम्**-लोकतन्त्रे प्रतिनिधीनां चयनं जनता साक्षाच्चयनं करोति। प्रतिनिधीनां चयनं मण्डले अथवा संसदीयक्षेत्रे भवति। अथवा नाना समानुपातिकव्यवस्थायां सर्वेषां मतदातृणां प्रतिनिधित्वं कुर्वन्ति। केषुचित् देशेषु मिश्रिता व्यवस्था प्रयुक्ताऽस्ति। तात्पर्यमेवमेव प्रकारेण लोकतन्त्रव्यवस्थायां प्रतिनिधिः निर्वाचितो भवति। प्रसङ्गेऽस्मिन् महाभारते वर्ण्यते-

**"अकार्याणां कियाणां च संयोगं यः करोति वै।**

**कार्याणमकियाणां च स पार्थ पुरुषाधमः॥"**[1]

चयनानन्तरं लोकहितार्थं कार्यनीतेः निर्धारणं प्रतिनिधयः स्वयमेव कुर्वन्ति। यद्यपि दलगताः नीतयः मतदातृणां मध्ये प्रतिनिधेः विरोधत्वं, तथा पुनर्मतदानार्थं प्रभावं कुर्वन्ति, किन्तु सामान्यतः अस्मिन्नपि केचन बाध्यकारिणः अनुदेशाः भवन्ति।

**उदारलोकतन्त्रम्**– प्रतिनिधिः स्वयमेव एकं लोकतन्त्रं भवति। यत्र स्वच्छतया निष्पक्षतया च चयनं भवति। उदारलोकतन्त्रस्य चरित्रगतलक्षणेषु अल्पसंख्यकानां सुरक्षा, नियमानां व्यवस्था, शक्तीनां वितरणं, अभिव्यक्तेः स्वातन्त्र्यम्, भाषासभाधर्मसम्पत्तीनां च स्वतन्त्रतायाः प्रामुख्यमस्ति।

**प्रत्यक्षलोकतन्त्रम्**– प्रत्यक्षलोकतन्त्रे सर्वे नागरिकाः सर्वेषु महत्वपूर्णेषु नीतिगतनिर्धारणेषु च मतदानं कुर्वन्ति। एतदर्थमेवास्य नाम प्रत्यक्षलोकतन्त्रम्। यतो हि सैद्धान्तिकरूपेण अत्र कोऽपि प्रतिनिधिः अथवा मध्यस्थः न भवति। तदर्थमेव प्रत्यक्षं लोकतन्त्रं लघुसमुदाये, अथवा नगरे राष्ट्रे च भवति।

**आधुनिकलोकतन्त्रम्**- आधुनिकलोकतन्त्रस्य काऽपि सुनिश्चिता सर्वमान्या परिभाषा न सम्भवति या परिभाषा सम्पूर्णं प्राचीनमैतिह्यं स्वस्मिन् समाहितं कर्तुं समर्था स्यात्। विभिन्नेषु युगेषु विभिन्नः परिभाषाः प्राप्यन्ते। परन्तु एतत् सर्वदा स्वीकृताऽस्ति यत् लोकतन्त्रीया व्यवस्था साऽस्ति यस्यां जनतायाः प्रभुत्वं भवति। परन्तु विषयोऽयं विवादास्पदमेव प्रतिभाति। परन्तु यावत्पर्यन्तं लोकतन्त्रस्य परिभाषाविषयिणी चर्चा भवति तदा महाभारतस्थ भीष्ममतानुसारेण लोकतन्त्रं नाम जनताद्वारा जनताया उपरि जनतायाः शासनम्। लोकतन्त्रे जनता एव सत्ताधारी भवति। तस्यानुमतिरनुसारेण शासनं भवति। तस्याः जनतायाः प्रगतिरेव शासनस्य मुख्यमुद्देश्यं भवति। लोकतन्त्रमिदं न विशिष्टं किमपि तथ्यं प्रस्तौति, अपि तु विशिष्टराजनैतिकदलानां, सामाजिकसंगठनानां, आर्थिकव्यवस्थायाः नैतिकमानसिकभावनायाश्च नाम एव। लोकतन्त्रं जीवनस्य समग्रं दर्शनमस्ति। यस्याः व्यवस्थायाः व्यपकपरिधौ मानवानां सर्वे पक्षाःआगच्छन्ति। यस्यां जनभावनायाः अभिव्यक्तिः जनताद्वारा निर्वाचितप्रतिनिधिभिः स्पष्टा भवति। जनता स्वयं शासनं न कुर्वती निर्वाचनपद्धत्या शासनं वैज्ञानिकरीत्या उत्तरदायित्वपूर्णं निर्माति। इदमेवतत्वमाधुनिकलोकतन्त्रस्य।

## अध्ययनस्य उद्देश्यम् (Objectives of the study):

अध्ययनस्य उद्देश्यम् वर्ण्यते-

१) **राजनैतिकी जागृतिः**- लोकतन्त्रीये प्रशासने जनेषु राजनैतिकी चेतना भूयसी जागृता भवति। जनता स्वकीयमधिकारं कर्तव्यञ्च ज्ञात्वा प्रशासने अभिरुचि युक्ता भवति। विविधेषु शास्त्रेषु अपि जनानामिदमधिकारमस्ति न वेति ज्ञानाय अध्ययनस्यावश्यकता।

२)**राष्ट्रियचरित्रस्योन्नतिः**- लोकतन्त्रप्रशासने प्रजासु स्वाभिमानस्य आत्मसम्मानस्य च भावना प्रबला भवति। तेन च भवति राष्ट्रियचरित्रस्य अभ्युन्नतिः। शास्त्रेषु अपि प्रजानां चरित्रस्योन्नतेरवकाशः अस्ति न वेति प्रश्नस्य समाधानाय अनुशीलनमिदं परिकल्पितम्।

३) **सर्वकारस्योपरि दायित्त्वम्** –लोकतन्त्रे प्रशासकाः जनतया चयनिताःभवन्ति। अतः ते मनोयोगपूर्वकं जनतायाः हितसंरक्षणे कृतयत्नं भवन्ति। अर्थात् सर्वकारस्योपरि दायित्त्वमेकं वर्तते। संस्कृतसाहित्यस्य विविधेषु शास्त्रेषु वर्णितः राज्ञोपरि दायित्त्वमिदमस्ति न वेति अन्वेषणाय अध्ययनमिदं परिकल्पितम्।

४) **सर्वकारस्य प्रगतिशीलता** – प्रशासने प्रशासनं प्रगतिशीलं भवति। जनताया आवश्यकतायाः ज्ञानं साहसैः प्राप्नोति च। फलतः परिस्थित्यनुसारेण प्रशासने परिवर्तनमपि सुकरं भवति। शास्त्रे परिस्थित्यनुसारेण शासनपद्धतेः परिवर्तनस्य प्रचलनमासीत् न वेति समाधानाय अस्य अध्ययनस्य प्रयोजनीयम्।

५) **वर्तमानपरिस्थितौ लोकतन्त्रस्योपयगिता** –वैज्ञानिकमिदं युगम्। अस्मिन् युगे प्रशासनस्य कार्यं सर्वैरवगतमनायासेन। वर्तमाने जनता साम्प्रतं प्रतिबन्धाधिक्यं सोढुमुद्यता नास्ति। अस्यां परिस्थितौ लोकतन्त्रमेव सर्वाधिकोपयुक्तं शासनमाभाति। शास्त्रे इयमुपयोगितायाः प्रभावाः कीदृशाः तस्याः निरूपणमेव अस्माकमालोच्याः विषयाः।

[1] **महाभारतम् कर्णपर्वम् ६९/१८**

**६) सर्वेषां जनानां हितस्य सुरक्षा –** लोकतन्त्रप्रशासनस्योद्देश्यमेवं भवति प्रजानां हितस्य संरक्षणम् । शास्त्रेषु वर्णितः प्रजां प्रति इयं सुरक्षा अस्ति न वेति अन्वेषणाय अध्ययनस्यावश्यकता ।

**७) सर्वेषां जनानां स्वप्रतिभायाःविकाशस्यावसरो-** लोकतन्त्रीय-प्रशासने सर्वेषां जनानां समानरूपेण स्वप्रतिभायाः विकाशस्यावसरो विद्यते । शास्त्रेषु अपि नागरिकाः स्वप्रतिभाबलेनैव स्वोत्कर्षं कामयन्ति । परञ्च ते समर्थाः न वेति इति प्रश्नस्य समाधानाय अध्ययनस्यावश्यकता ।

**८) असन्तोषविद्रोहयोरल्पीयसी सम्भावना –** लोकतन्त्रशासने प्रायेण प्रजानां प्रतिनिधयरेव प्रशासकाः भवन्ति, अत अस्यां व्यवस्थायां सन्तोषस्य विद्रोहस्य वा सम्भावना क्षीयते । शास्त्रेषु अपि इयं व्यवस्थायावकाशरस्ति न वेति ज्ञानाय अध्ययनस्यावश्यकता ।

**९) देशभक्तेरूदयः-** लोकतन्त्रप्रशासनं यतो जनतायाः भवति, जनतायैव भवति, जनतया भवति , अतएव जनानां देशविषये भक्तिभावना उदेति । संस्कृतसाहित्यस्य विविधशास्त्रेऽपि जनानां देशभक्तिरस्ति न वेति प्रश्नस्य समाधानाय वर्तमान-अध्ययनस्यावश्यकता ।

**१०) आदर्शनागरिकताया उत्तमा पाठशाला –** लोकतन्त्रीये प्रशासने नागरिकेषु सेवायाः, आत्मनिर्भरतायाः, स्वावलम्वनस्य, सहिष्णुतायाः, बन्धुत्वस्य च भावना उदेति । शास्त्रे इयमोत्तमा पाठशाला अस्ति न वेति अन्वेषणाय अध्ययनमिदं परिकल्पितम् ।

## अध्ययनस्य व्याख्या विश्लेषणञ्च ( Analysis and Interpretation of the study)

भारतीयसंस्कृतौ आदिकालात् **"यथा राजा, तथा प्रजा"** इत्युक्तिः प्रचलितास्ति । परन्तु लोकतन्त्रे सैव न्यायः विपरितया कार्यं करोति । इदानीं तु **"यथा प्रजा, तथा राजा"** इति न्यायेन कार्यं चलति । लोकतन्त्रशासनस्य तद् साफल्यं भवितुमर्हति यदा प्रजाः सुशिक्षताः शिष्टाः धर्मपरायणाःकर्तव्यनिष्ठिताःपरोपकारव्रताः नीतिनिपुणाः स्युः नान्यथा । भारतीयशास्त्रानुशीलनेन ज्ञायते यत् इयं पद्धतिः प्राचीनकालात् प्रचलितासीत् । यथा-

**प्रथमतः- ऋग्वेदे राज्ञः कृते प्रजातन्त्रानुसरणाय उपदेशः विद्यते-"विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत्"**[2] अर्थात् सर्वाः प्रजाः त्वां कामयन्तां त्वदीयराष्ट्रञ्च लोकतन्त्रमपि स्वराज्यसंवलितं भवेत् । **"विशि राजा प्रतिष्ठितः"**[3]। विशि प्रजायामेव राज्ञः प्रतिष्ठानं भवति । प्रजया निर्वाचितपद्धत्या राजा प्रतिष्ठापितः भवति । स्वराज्यं हि नाम राष्ट्रस्य परमोत्कर्षधारकं तत्त्वम् । सर्वेषां स्वराष्ट्रियप्रजानां सम्मत्या प्रतिनिधित्वविधया प्रवर्तितं यद्राज्यं तत्स्वराज्यपदेन व्यपदिश्यते । तादृशस्वराज्योपलब्धर्थमेव जनैःप्रयतितव्यमिति ऋग्वेदेऽपि समुपदिष्टम् । वेदे स्वराज्यमहिमा वर्णनार्थमेकमखिलं सूक्तमेव विद्यते, तत् हि स्वराज्यसूक्तमिति नाम्ना कथ्यते । अन्यत्रापि बहुत्र स्वराज्यगुणगरिमा अवलोक्यते- यदजः प्रथमं संबभूव सह तत्स्वराज्यमियाय । यस्मान्नान्यत् परमस्ति भूतम् । इति ऋग् । कस्यापि राष्ट्रस्य कृते स्वराज्यसदृशमन्यत् महद्वैभवं नास्ति । एतेन ध्वन्यते यत् लोकतन्त्रशासनमपि तदेव उत्कृष्टं यत्स्वराज्यसंवलितं भवेत्। येन च भवति राष्ट्रियचरित्रस्य अभ्युन्नतिः।

**द्वितीयतः**:- महाभारतस्य अनुशासनपर्वे अपि लोकतन्त्रस्य भावना निहिता अस्ति । तत्र राज्ञः प्रतिनिधित्वविषये वर्ण्यते यत् यो हि कुलीनः, नीतिपरायणः, देशकुलादिधर्मविशेषज्ञः राज्यकार्यसम्पादने दक्षः , विभागविशेषज्ञः स एव राज्ञः प्रतिनिधिः भवति । यत्कार्यं राजहिते नास्ति यदि तच्छीघ्रसम्पादनयोग्यं स्यात् यच्च राज्याय लाभप्रदं हितप्रदञ्च तत्सर्वं ज्ञात्वा यः कार्यं साधयति स एव राजप्रतिनिधिः भवति । अर्थात् उपरोक्तलक्षणविशिष्ट एव प्रतिनिधित्वं निर्वहति -

**"एवं सर्वविधायेदमिति कर्तव्यतात्मनः ।**
**युक्तश्चैव प्रमत्तश्च परिरक्षेदिमाः प्रजाः ।।"** [4]

एवं प्रकारेण प्रकृत्यादिवर्गान् स्व स्वाधिकारे संस्थाप्य राजास्वकर्तव्ययुक्तो भूत्वा प्रजानां सर्वप्रकारेण संरक्षणं कुर्यादिति । यदि दैववशात् राजा अष्टादशव्यवहारसम्बन्धिनं कार्यं दर्शनेऽसमर्थः तदा तस्मिन् काले न्यायविशेषज्ञं, धर्मज्ञं , जितेन्द्रियं , उच्चकुलोत्पन्नं प्रतिनिधिरुपेण नियुक्तं कृत्वा कार्यं चालयेत् । नहि केवलमेवमेव अपि तु अस्वस्थ्यदशायां ,वैदेशिकयात्रायां , राजा उपरोक्तं संस्थाप्य गच्छेदिति । अर्थात् जनता स्वकीयमधिकारं कर्तव्यञ्च ज्ञात्वा प्रशासने अभिरुचि युक्ता भवति ।

**तृतीयतः** - एषः लोकतन्त्रप्रसङ्गः लौकिकसंस्कृतसाहित्येषु अपि दरीदृश्यते । पुराकाले यः कौटिल्यनामधेयः आचार्यचाणक्यः बभूव । तेन कूटनीतिधुरन्धरेण एकायत्तं नन्दवंशप्रशासनमुच्छिद्य मौर्यकूलभूषणं चन्द्रगुप्तं राज्यसिंहासने प्रतिष्ठापितम् । महान् राजनीतिज्ञः कौटिल्यः चन्द्रगुप्तस्य कृते साम्राज्यधुरं निर्वोढुमर्थशास्त्रनामकं लोकविश्रुतं राजनीतितन्त्रमरचयत् । तस्मिन् अर्थशास्त्रे लोकतन्त्रपद्धतिमवलम्ब्यैव राज्यतन्त्रं सञ्चालयितव्यमिति गहनतया सुनिपुणं प्रतिपादितम् । **कौटिल्यविरचिते अर्थशास्त्रे** सम्पूर्णभिन्नरूपेण

---

[2] **ऋग्वेदः १०.१७३**
[3] **तैत्तिरीयब्राह्मणम्**
[4] **महाभारतम् , अनुशासनपर्वम्४/१७४**

लोकतन्त्रस्य भावना व्याख्या वा प्रस्फुटिता अस्ति। तत्र प्रजासुखे राजा सुखमनुभवति। प्रजानां हिते राजा हितमनुभवति। न हि आत्मसुखं प्रजानां हितमेव राज्ञः सुखमिति भावः। तथाहि वर्ण्यते-

**"प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्॥"** [5]

अतः वक्तुं शक्यते यत् अर्थशास्त्रे येन प्रकारेण लोकतन्त्रस्य चर्चा दृश्यते अन्येषु ग्रन्थेषु तस्या आलोचनायारभावः दृश्यते। अर्थात् लोकतन्त्रप्रशासनस्य यत् उद्देश्यं तत् सम्पूर्णरुपेण अर्थशास्त्रे वर्णितम् अस्ति। तत्र प्रजानां हितस्य संरक्षणम् प्रजां प्रति सुरक्षा च वर्णितम् अस्ति।

**चतुर्थतः -वाल्मीकिविरचिते रामायणे** रामराज्ये लोकतन्त्रात्मकशासनप्रणाली बाह्यरूपेण प्रचलितासीत् तत्र प्रजानुरञ्जनं हि राज्ञः श्रेष्ठः धर्मरूपेण परिगण्यते। अत्रापि लोकतन्त्रप्रशासनस्य यत् उद्देश्यं वर्तते तत् सम्पूर्णरुपेण वर्णितम्। अर्थात् प्रजानां हितस्य संरक्षणम् प्रजां प्रति सुरक्षा च अत्रापि वर्णितम् अस्ति।

**पञ्चमतः - महाकविकालिदासविरचिते विक्रमोर्वशीयनाटके अपि** दृश्यते प्रजानुरञ्जनं हि राज्ञः राजधर्मः। तत्र प्रजापालने नास्ति विरामः विश्रामो वा। प्रजापालनमेव राज्ञ आराधना। तथाहि उच्यते **- "अविश्रामोऽयं लोकतन्त्राधिकारः"** [6]

**षष्ठतः- मनुसंहितायां राजधर्मनामसप्तमाध्याये** राजतन्त्रलोकतन्त्रयोः भावना निहितास्ति। तत्र प्रजां प्रति राजानमाचरणमेवं राजानं प्रति प्रजानामाचरणं, राज्ञः राज्यशासनपद्धतिमिति विषयमवलम्ब्य विस्तृतरूपेण आलोचिताः। यथा-प्रजानां रक्षणं, योग्याय दानं, यज्ञकरणम्, वेदाध्ययनम्, दुर्व्यसनेषु अप्रसक्तिः, इत्यादीनि कर्माणि क्षत्रियेषु भगवता विहितम्। तथाहि उक्तम्-

**"प्रजानां रक्षणं दानमिज्याध्ययनमेव च।**
**विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥"** [7]

प्रजानां न्यायपूर्वकं संरक्षणमेव राज्ञः परमो धर्मः। यतो हि निर्दिष्टं फलं धर्मस्य षष्ठांशस्य दायी भवति। न्यायपरायणः राजा एव धर्मात्मा भवति –

**"क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्।**
**निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते॥"** [8]

युद्धेष्वपराङ्मुखत्वं, प्रजानां रक्षणं, ब्राह्मणपरिचर्या एतद्राज्ञामतिशयितं स्वर्गादिश्रेयःसाधनम्-

**"संग्रामेष्वनिवर्तित्वं प्रजानाञ्च पालनम्।**
**शुश्रुषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम्॥"** [9]

अर्थात् मनुसमये राजानः मनोयोगपूर्वकं जनतायाः हितसंरक्षणे कृतयत्नं भवन्ति स्म। तेषामुपरि आधुनिकसर्वकारस्य इव दायित्त्वमेकं विद्यमानं वर्तन्ते स्म। अर्थात् मनुसंहिता नाम इदं धर्मशास्त्रे लोकतन्त्रस्य या भावना अस्ति आधुनिककालेऽपि राजनीतिशास्त्रे सममेव प्रयोक्तव्यम् इयं भावना इति वक्तुं शक्यते।

**सप्तमतः-भागवतेऽपि** राजानां कर्तव्याकर्तव्ययोः विषये सुस्पष्टः निर्देशः विहितः। तत्र दुष्टानां शासनं शिष्टानाञ्च परिपालनस्य विधानं विहितम्। तस्मात् कथ्यते-

---

5 **अर्थशास्त्रम्१५.२१.१०**

6 **विक्रमोर्वशीयनाटकम्**

7 **मनुसंहिता १ /८९**

8 **मनुसंहिता ७ /१४४**

9 **मनुसंहिता ७ /८८**

**"दुष्टानां शासनाद्राजा शिष्टानां परिपालनात् "** [10]

**अष्टमतः- भवभूतिविरचिते उत्तररामचरितेऽपि** प्रजासुखस्य भावना निहितास्ति। तत्र प्रजानां हिताय सुखाय च राजा सर्वं त्यक्तुं समर्थः । तथाहि उच्यते-

**" स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।**
**आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ।।"** [11]

**नवमतः-** शुक्रनीतौ राजधर्मस्य बहुमहत्वं वर्णितमस्ति । तत्र लिखितमस्ति यत् ये हि राजधर्मे तत्पराः भवन्ति सर्वे देवांशभूताः भवन्ति । ये राजानः अधर्मिणः सन्ति ते राक्षसांशाः भवन्ति । एवंभूतः राजा धर्मस्य लोपं करोति । प्रजाभ्यः पीडां ददाति । पवनः यथा सुरभरसुरभि प्रेरकः भवति तथैव राजा धर्माधर्मस्य प्रेरकः भवति। धर्मस्य प्रवर्तकः अधर्मस्य नाशकः राजा एव भवति यथा अन्थकारस्य नाशकः सूर्यः भवति । पितृमातृगुरुभ्रातृबन्धुकुवेरयमादीनां सप्तानां समुदायः राजा भवति, अन्यथा न भवति । पितृवत् राजा प्रजानां गुणवर्धने तत्परः स्यात् । प्रजानां ये अपराधाः सन्ति तेषां मातृवत् क्षमां कृत्वा अग्रे सारयतु । स्वकीयं निन्दितं गुणं परित्यक्त्वा निन्दासहनं कुर्यात् । स्वप्रजां दानमानसम्मानदानेन प्रसन्नं कुर्यात् । दमनशीलः शुरवीरः अस्त्रकुशलः शत्रुनाशकः आचारणयुक्तः बुद्धिमान् ज्ञानविज्ञानयुक्तः राजा भवेत् । अधमधर्मरहितः दीर्घदर्शी वृद्धानां सेवकः उत्तमनीतिमात्रगुणज्ञः राजा देवतांशः भवति ।

पूर्वोक्तेभ्यः गुणेभ्यो ये राजानः विपरीताः भवन्ति ते राक्षसांशाः भवन्ति । राज्ञः दृष्ट्या प्रजा निर्धना भवति । धर्माधर्मशिक्षया युगानां प्रवृत्तिरपि राज्ञया भवति । नहि युगस्य दोषः न प्रजानां अपि तु राज्ञः एव दोषः भवति । यतो हि मनुष्य तदेवाचरणं करोति येनाचरणेन राजा प्रसन्नो स्यात् । यत्र राजा महापापी भवति तत्र मानवा अधर्मे तत्पराः भवन्ति । न हि कालेन वृष्टिर्भवति नहि सस्यानामुदयः स्यात् । यावत्कालपर्यन्तं राजा धर्मशीलः भवति तावत्कालपर्यन्तं एव स राजा भवति । अन्यथा राजा एवं जगत् उभयोर्नाशः भवति । प्रोक्तञ्च शुक्रनीतौ-

**"यो हि धर्मपरो राजा देवांशोऽन्यश्च रक्षसाम्।**
**अंशभूतो धर्मलोपी प्रजापीडाकरो भवेत् ।।"** [12]
**"वायुर्गन्धस्य सदसत्कर्मणः प्रेरको नृपः।**
**धर्मप्रवर्त्तकोऽधर्मनाशकस्तमसो रविः ।।"** [13]

**"पिता माता गुरुर्भ्राता बंधुर्वैश्रवणो यमः ।**
**नित्यं सप्तगुणैरेषां युक्तो राजा न चान्यथा ।।"** [14]
**"गुणसाधनसंदक्षः स्वप्रजायाः पिता यथा ।**
**क्षमयित्र्यपराधानां माता पुष्टिविधायिनी ।।"** [15]
**"स्वान् दुर्गुणान् परित्यज्य ह्यतिवादांस्तितिक्षते ।**
**दानैर्मानैश्च सत्कारैः स्वप्रजारञ्जकः सदा ।।"** [16]

यदि राजा प्रजाभ्यः उत्तमां शिक्षां न ददाति तर्हि चालकरहितनौवत् स्थितिः भवति। यथा सा नौः जलमध्ये पतिता भवति तथैव प्रजाः अपि अज्ञानसमुद्रे निमग्नो भवति।

यदि राजा प्रजाभ्यः धर्मस्य विद्यायाश्च शिक्षणं न दापयति तदा प्रजाः घोरान्धकारे निमग्नाः भवन्ति । तथाहि उक्तं शुक्रनीतौ –

---

[10] भागवत् १.७.११
[11] उत्तररामचरितम् १.१२
[12] शुक्रनीति-१/७०
[13] शुक्रनीति-१/७४)
[14] शुक्रनीति-१/७८
[15] शुक्रनीति-१/७९)
[16] शुक्रनीति-१/८४

**"यदा न स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः ।**
**अकर्णधारा जलधौ विप्लवेतेह नौरिव ।।" [17]**

अतःएतेन धन्यते यत् शास्त्रेऽपि परिस्थित्यनुसारेण शासनपद्धतेः परिवर्तनस्य प्रचलनमासीदिति।

**दशमतः -** यः अजितेन्द्रियः स राज्यनिर्वहने समर्थो न भवति । कौटिल्येन स्वकीये अर्थसास्त्रे प्रोक्तं यत् आत्मविजयमनिवार्यं भवति राज्यसञ्चालनाय । "आत्मविजयाय प्रतिनिधिः प्रयत्नशीलो भवेत्" । प्राचीनभारतेऽपि आत्मविजयस्य महती आवश्यकता उद्-घोषिताऽस्ति । तस्य कारणमिदं यत् राजा प्रजानां कृते आदर्शपुरुषः भवति स्म । तस्याचरणं सर्वसाधारणायानुकारणीयं भवति । स राजा प्रजायै अनुकरणीयः भवति स्म । जनप्रतिनिधेः सहयोगं विना जीवनस्य परममुद्देश्यस्य मोक्षस्य प्राप्तिर्नसम्भवति । तस्य जीवने प्रतिक्षेत्रं आचरणेन जनाः प्रेरणां प्राप्नुवन्ति । राज्ये राजनैतिकधार्मिकसामाजिकादि योजनानां दैनिकक्रियाचक्राणां राज्ञः प्रमुखं स्थानं भवति । अतः शास्त्रेषु अपि प्रजानां चरित्रस्य उन्नतेरवकाशः अस्ति इति वक्तुं शक्यते।

## सिद्धान्तः- ( Conclusion of the Study)

सृष्टिप्रपञ्चस्य प्रथमा वाणी वेद वर्तते । द्वापरयुगस्य अवसानकाले कलियुगस्य प्रारम्भे अयं वेदः वेदव्यासेन चतुर्धा विभक्तः । यथा **भागवते** उच्यते – **"कलिद्वापरयोः अवसानकाले वेदव्यासः वेदं व्यभजत्"** । ततः एव मनुष्यां संस्कारः संस्कृतिश्च परिवर्धमाना वर्तते । अनुदिनं इयं सृष्टिः परिवर्धिता । स्वयम्भूः मनुः आरभ्यः सृष्टिक्रमः प्रचलितः ।

तदानीं एव इयं पृथिवी विस्तीर्णा सञ्जाता । विदूषां मतानुसारेण तृतीयमनुः समये चन्द्रमा चन्द्रः पृथिव्यात् पृथकः अभवत् । तदानन्तरं समुद्रेभ्यः पृथिवीः निर्गता । पञ्चममनुः समये वनस्पतयःप्रादुर्भूता । षष्ठमनुसमये पशुपक्षिणः अजायन्तः । सप्तमवैवस्वतमनुसमये मनुष्याः प्रदुर्भूता । इदानीं अष्टाविंशति कलियुगः प्रचलति । तत्र अस्य कलियुगस्य अयं प्रथमसोपाणः वर्तते । इदानीं आधुनिकसमाजस्य लोकयात्रा केन प्रकारेण प्रचलति इति विचारणीयः विषयः वर्तते । यद्यपि विविधेषु शास्त्रेषु सर्वत्र लोकतन्त्रस्य चर्चा अस्माभिः दृश्यते । परञ्च आधुनिकसमाजे कुत्रापि लोकतन्त्रं न दृश्यते। सर्वत्र अधिकारतन्त्रमेव प्रतिभाति । यदा भारतसर्वकारस्य निर्वाचनं भवति, तदानीं सर्वे नेतारः आमुक्तकण्ठेन उद्घोषयन्ति अधुना इदं लोकतन्त्रम् वर्तते । अत्र अस्मिन् तन्त्रे सर्वेषां समधिकारः वर्तते । परञ्च मतदानसमये वयं पश्यामः यत् शतप्रतिजनेषु केवलमात्रं पञ्चशतप्रतिशतं किंवा चत्वारिंशत् किंवा षष्ठीप्रतिशतजनाः एव मतदानं कुर्वन्ति । तत्रापि केचन जनाः अन्येन मतेन सम्वलिताः सन्ति । तर्हि निरपेक्षभावेन विचार्यते चेत् विंशति-प्रतिशतजनाः एव स्वाधीनरुपेण मतदानं कुर्वन्ति । अनेन ज्ञायते यत् विंशत्प्रतिशतजनानां एव अयं सर्वकारः नियुक्तः । तर्हि कुत्र लोकतन्त्रम् ? इदानीं कुत्रापि लोकतन्त्रस्य राजतन्त्रस्य च सत्ता न विद्यते । सर्वत्रैव अधिकारतन्त्रं विराजते । ये कृषकाः सन्ति ते कष्टेन अन्नमुत्पादयन्ति । तेषां परिवारस्य शिक्षणरक्षणभरणव्यापारः कया रीत्या प्रचलिष्यति इति विचारणीयः विषयः । अनुदिनं ते कृषकाः आत्महत्यां कुर्वन्ति । उपार्जितस्य अन्नस्य उचितमूल्यप्राप्तये ते प्रयतन्ति । यदा सर्वकारं प्रति किमपि वक्तुमिच्छति तर्हि तत्रतः सर्वकारस्य लुण्ठकाः विरोधं प्रदर्शयन्ति । तर्हि कुत्र लोकतन्त्रम् ? प्राचीनकाले धर्मरक्षार्थं राजनीतिः भवति स्म । इदानीं राजनीतिसंरक्षनार्थं धर्मपथरूढाः जनाः दृश्यन्ते । अस्माकं ऋषयः वदन्ति स्म – प्रथमा संस्कृतिर्विश्ववाराः धर्मरक्षति रक्षितः । इदानीं एतत् सर्वं विलुप्तं प्रतिभाति । धर्मस्य अवनतिः अनुदिनं दृश्यते । इदम् अधिकारतन्त्रं सर्वेषां घातकः वर्तते । तस्मिन् समये लोकतन्त्रविषये एकः श्लोकः श्रूयते स्म । यथा उच्यते –

**"न राज्यं न च राजा आसीत्, न दण्डो न च दाण्डिकः ।**
**धर्मेणैव प्रजाः सर्वा, रक्षन्ति स्म परस्परम् ।।" [18]**

अनेन श्लोकेन ज्ञायते यत् तदानीं लोकचेतना मनुष्येषु आसीत् । तन्त्रम् अर्थात् शासनं स्वयमेव सञ्चारितमभवत् । तन्त्रस्य स्वकीयं एकैकं अङ्गं स्वयमेव सञ्चालितं भवति स्म । तदानीं स्वधर्मपालनाय जनाः सहजरुपेण लोकधर्मस्य अनुपालनं कुर्वन्ति स्म । यदा मनुष्यः धर्मस्य पालनं करोति ततः एव पुत्रधर्मः पिताधर्मः माताधर्मः भगिनीधर्मः भात्रीधर्मः मित्रधर्मस्य प्रादुर्भूताः भवन्ति । एते धर्माः एव सम्मिल्य एव विस्तृते लोकधर्मरुपेण मनुष्यां समक्षं उपस्तितं भवति । अस्मिन् कुत्रापि दोषः न दृश्यते । आधुनिकसमये अस्मिन् विकारः उद्भावितः । पाश्चात्यवासनावसिताः भारतीयजनाः भारतीय-लोकतन्त्रोपरि कुठाराघातं अहर्निशं कुर्वन्ति । यस्मात् कारणात् अधिकारबोधः सर्वत्र दरीदृश्यते । कुत्रापि आत्मबोधः कर्तव्यबोधस्य दृष्टिपथं नायाति । लोकतन्त्रस्य चत्वारि मुख्यानि यानि तत्वानि सन्ति ते भवन्ति -

---

[17] शुक्रनीति-१/६५

[18] महाभारतम् शान्तिपर्वम् १२.५८.१४

१.लोकानुभूतिः
२. लोक-अभिव्यक्तिः
३. लोकसञ्चरणम्
४. लोके विलयः इति ।

## १.लोकानुभूतिः-

लोकस्य अनुभूतिः लोकानुभूतिः इति कथनेन ज्ञायते यत् "तत् सुखेन सुखित्वम् तद् दुःखेन दुःखित्वम्" । स्वहृदये सममेव सर्वेषां हृदयं इति यदि वयम् अनुभवामः तर्हि एव लोकानुभूतिः सम्यकप्रकारेण भवितुमर्हति। परञ्च इदानीं समाजे स्वार्थपरायणाः जनाः भ्रातरं पितरं अपि घातयन्ति । सर्वत्र अनाचार-दुराचार-भ्रष्टाचारानाञ्च विकाशः दृश्यते । अन्यः अपरं यदा शोषयति तदा एव तस्य सन्तुष्टिः भवति । परञ्च वैदिकसंसस्कृतिः उपदिशति-

**" मा भ्राता भ्रातरं दिक्षन् ,मा स्वसारमुत स्वसा ।**
**सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।।"** [19]

एतेषु वैदिकमन्त्रेषु ऋषयः सनातनलोकधर्मस्य वा तन्त्रस्य यद् मूलोद्देश्यं वर्तते तत् प्रतिपादितवन्तः । तेषां मनसि लोकधर्मीयगुणाः विद्यमानाः आसीत् । इदानीं अधिकारतन्त्रे लोकतन्त्रस्य विस्मरणं सर्वत्र दृश्यते ।

## २. लोक-अभिव्यक्तिः

लोकतन्त्रस्य इयं परम्परा वर्तते यत् लोके सर्वे जनाः स्व-स्वमतं स्वतन्त्ररुपेण उपस्थापयितुं शक्नुवन्ति । परञ्च अद्य समाजे एतादृशी व्यवस्था न वर्तते । यदि कोऽपि मनुष्यः तस्यापि विरुद्धं स्वमतं प्रस्तौति तदा तस्य मतेन साकं तस्यापि मृत्युः भवति । मुखं पिधाय एव जनाः इदानीं समाजे तिष्ठन्ति । सर्वत्र वाहुवलीनां अधिकारः साम्राज्यञ्च दृश्यते । यथा आङ्गलभाषायां उच्यते - "Survival of the fittest" अर्थात् "वलवान एव जीवति"

एते मनुष्याः "Highest Consumers" इति रुपेण विराजन्ति । ते सर्वं भक्षयन्ति । तेषां कृते कुत्रापि विरामः न वर्तते । ये सामान्य-जनाः सन्ति ते भयकारणात् स्वकीयं मतं कदापि न प्रकटयन्ति । अतः अनुमीयते यत् अस्मिन् अधिकारतन्त्रे लोकाभिव्यक्तिः कुत्रापि न वर्तते । अस्माकं संस्कृतसाहित्ये लोकाभिव्यक्तेः अनेकानि उदाहरणानि दृष्टिपथरुढाः भवन्ति । यथा- रामायणे सीताविषयकः लोकापवादः श्रुयते । तत्र सामान्यजनाः स्वकीयं मतं प्रस्तूय राजधर्मपालनाय रामं उपदेशितवन्तः । तदा रामः विचिन्तय्य सीतां परित्यज्य लोकधर्मस्य पालनं अक्रियत । इदानीं राजनैतिकविश्लेषकाः दुर्वुद्ध्या किंवा सुवुद्ध्या समाजे एतादृशी मनोभावना उद्भावयन्ति यस्मात् कारणात् जनाः स्वतन्त्ररुपेण किमपि वक्तुं एव न इच्छन्ति ।

## ३.लोके-सञ्चरणम् –

**"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।"** [20]

प्राचीनकाले इयं वैदिकपरम्परा प्रचलिता आसीत् परन्तु आधुनिकसमाजे मानवानां मध्ये इयं परम्परा अस्माभिः न दृश्यते । लोकतन्त्रे इयं परम्परा अधिकरुपेण अनुसरणीयः । अधुना मानवाः स्वार्थे नियुक्ताः सन्ति । सर्वत्र स्वस्मिन् विषये निमग्नाः भवन्ति । येन लोकतन्त्रस्य भावनां निहतं भवति । यदि प्रजानां मध्ये सममेव मानसिकतायाः अभावः दृश्यते तर्हि लोकतन्त्रं कदापि दृढी न भवति । अनायासेन प्रजानां मध्ये असन्तोषस्य विद्रोहस्य वा सम्भवना दृश्यते । अत्र लोके सञ्चरणमिति पदेन लोकानाम् आचरणं व्यवहारं मानविकतां च वोध्यते ।

[19] **अथर्ववेद** ३.३०.३
[20] **ऋग्वेदः** १०.१९१.२

### ४. लोके विलयः-

अस्माकं ये महापुरुषाः सन्ति तेषां जीवनदर्शनं सर्वदैव अनुसरणीयाः । ते तेषां कर्मेण अस्माकं मनसि जीवन्ति । यद्यपि तेषां नश्वरदेहं विलुप्तं जातं तथापि तेषां कर्म अद्यापि सममेव प्रयुक्तम्। तेषां जीवने किमपि सम्पदं नास्ति। तत् सम्पदं लोकानां मध्ये विलयः जातः। अतः एतादृशानां महापुरुषाणां जीवनमार्गं लोकतन्त्रे अनुसरणीयः ।

विविधेषु शास्त्रेषु अध्ययनेन परिशेषे अस्माभिः वक्तुं शक्यते यत् प्राचीनकाले लोकतन्त्रप्रणाल्यां जनप्रतिनिधीनां विशिष्टं स्थानमासीत् परन्तु वर्तमानलोकतन्त्रे जनप्रतिनिधीनां कृते योग्यतायाः महत्वपूर्णं स्थानं नास्ति, अपि तु गौणमेव । एतदर्थं जनाधार एव महत्वपूर्णं स्थानं भजते । संस्कृतसाहित्ये जनप्रतिनिधीनां कृते दिशानिर्देशः कृतः विद्यते । यदि तेषां प्रयोगः जनप्रतिनिधयः अथवा चयनप्रक्रिया स्वस्मिन् प्रशासनपद्धतौ नयेत् तदा शासनसञ्चालने महत्वपूर्णं स्थानमलभेत् ।अतः लोकतन्त्रीयशासनप्रणाल्यां ये ये प्राचीनाधुनिकाः विचाराः प्रस्तुताः सन्ति तेषां समेषां विचाराणां संस्कृतसाहित्ये यत्र तत्र सर्वत्र प्रायः उपलब्धिर्भवति । तेषां स्वरूपगतं चिन्तनमपि प्राप्यते । तत्स्वरुपगतं चिन्तनं ग्रन्थेभ्यः भिन्नमिव प्रतिभाति । व्यवहारिकधरातले तेषां विचाराणां दर्शनं तथा न भवति यथा अपेक्षते । अद्यत्वे लोकतन्त्रस्य विकृतं स्वरुपं दृग्गोचरी भवति । स्वतन्त्रता तथा समानतायाः नाम्ना उच्छृङ्खलतायाः बाहुल्यं दृश्यते ।

समाजे मात्स्यन्यायव्यवस्था अक्षिप्रत्यक्षी भवति । सर्वसाधारणजनता मुक्भूत्वा अन्यायस्य सहनमेव करोति । अभिव्यक्तिस्वतन्त्रतायां विकृतप्रदर्शनं दृश्यते । यदि कोऽपि एवं वदति यत् मानवतायाः स्थाने दानवतायाः आविर्भावः जन्यते तदा न अतिशयोक्तिः । लोभातुरः मानवः सम्पत्तिसंग्रहार्थं निरंकुशो भूत्वा कार्यं करोति । अधिकाधिकसम्पत्तिसञ्चये एव जनाः लग्नाः सन्ति । अस्य विरोधे श्रीमद्भागवतमहापुराणे प्रोक्तमस्ति यत् यया सम्पत्या जीविकोपार्जनं सम्भवति ताः एव सम्पत्तयः मान्याः भवन्ति । तदर्थापेक्षया संग्रहः दण्डनीयः भवति । प्रोक्तञ्च-

**"यावद् भ्रियेद् जठरं तावद् सत्वति देहिनाम् ।**
**अधिकं योऽमिन्येत सेस्तेनो दण्डमर्हति ।।"**[21]

आधुनिककाले विधि एवं नैयायिकक्षेत्रे दण्ड्यः दण्डं न प्राप्नोति अदण्ड्यः दण्डं प्राप्नोति। शिक्षायोग्योऽधिकारी शिक्षाभ्यः मुक्तः भवति । किमिदमेव लोकतन्त्रम् ? एतासां परिस्थितीनां निर्णेतुमस्माकं समक्षं संस्कृतसाहित्यस्य कौटिल्यविरचितम् अर्थशास्त्रम् एव दीपस्तम्भ इव प्रत्यक्षमागच्छन्ति । न केवलं जनतानिमित्तमेव अपि तु समाजस्योपरि शासनार्थमेव पाथेयः भवति । स्वतन्त्रभारते तत्कालीनाः राजनेतारः यां प्रणालीं स्वीकृतवन्तः तासां प्रणालीनां गुणदोषानुसारेण मूल्याङ्कनं भवति तदा प्रतिभाति यत् उत्तरोत्तरकाले तत्र ह्रास एव सम्मुखी भवति । तस्य ज्वलन्तमुदाहरणं वर्तमानकालिकं जनक्रोशपूर्णं वातावरणमेव । वर्तमानशासनप्रणाल्यां लोकसभा तथा राज्यसभारुपेण क्रियान्वयनं प्राप्यते । न्यायिकसंस्थानमस्ति । उच्चन्यायलयः सर्वोच्चन्यायलयश्चोभय मिलित्वा कार्यं कुरुतः । तथापि लोकतन्त्रो लोकपालविधेयकस्यावश्यकता प्रतीयते । तं लोकपालविधेयकं प्रस्तोतुं प्रयाशः प्रचलति । अस्मिन् विषये राष्ट्रीयस्तरे उच्चैः चर्चा श्रूयते । विचारेण स्पष्टमिदं भवति यत् लोकतान्त्रिकस्तरे अवमूल्यायनमेव प्रतिभाति । विधिं निषेधं च तिरस्कृत्य स्वेच्छाचारिता उत्तरोत्तरं वर्धिता भवति । तस्मिन् सन्दर्भे लोकतन्त्रविषये कोटिल्यविरचितम् अर्थशास्त्रं सामाजिकसंतुलननिर्वाहे दायित्वं निर्वहन्ति ।नैतिकमूल्यानां स्थापने अर्थशास्त्रम् अतीव भूमिकां निर्वहन्ति इति दिक् ।

[21] **श्रीमद्भागवतमहापुराणम्** २.५.७५